नं० ४६८३ – ब

नवग्रहस्थापनविधिः

पत्राणि ७ (सप्त)

नं० ४६-६३-ध

नवग्रहस्थापनविधिः

नं० ५६५२-ध

पत्राणि ७ (सप्त)

4693

F 7/2

[illegible]रांमस्येदंपुस्तकं

५५ श्रीगणेशायनमः॥नत्वागुरून्॥अथग्रहस्थापनंलिख्यते॥तत्रग्रहपीठेश्वेतवस्त्रमाछाद्यतन्मध्येरक्त
चंदनेनवर्त्तुलंद्वादशांगुलंमंडलंकृत्वाततआग्नेयेचतुरस्रंचतुर्विंशत्यंगुलंमंडलंश्वेतगंधेन
कृत्वामध्यमंडलाद्दक्षिणेत्रिकोणंत्र्यंगुलमंडलंरक्तचंदनेनकृत्वामध्यमंडलादीशान्येबाणा
कारंचतुरंगुलंमंडलंपीतगंधेनकृत्वामध्यमंडलादुत्तरेदीर्घचतुरस्रंषडंगुलंमंडलंपीतगं
धेनकृत्वामध्यमंडलात्पूर्वेपंचकोणंनवांगुलंमंडलंश्वेतगंधेनकृत्वामध्यमंडलात्पश्चिमे
धनुराकारंद्व्यंगुलंमंडलंकृष्णगंधेनकृत्वामध्यमंडलान्नैर्ऋत्येशूर्पाकारंपंचविंशत्यंगुलं
मंडलंकृष्णगंधेनकृत्वामध्यमंडलाद्वायव्येध्वजाकारंसार्द्धैकांगुलंमंडलंधूम्रवर्णगंधेन
कृत्वाउक्तस्थानेषुसूर्यादिप्रतिमानिधायतत्रव्याहृत्यादिमंत्रैरावाह्यस्थापयेत्॥अथ
वाशुक्लतंदुलैर्ग्रहान्स्थापयेत्॥तद्यथा॥अद्येत्यादिग्रहपीठदेवतास्थापनपूजनमहं
करिष्यइतिसंकल्पंकृत्वापीठमध्येवर्त्तुलमंडलेबणमहानितिमंत्रेणश्वेततंदुलैःस्थापे ॥१॥

स्या१
पयेत्॥ॐभूर्भुवःस्वःसहस्रदीप्तिरक्तोनोग्रहाणांप्रथमस्तथा॥त्वामादित्यंसर्वज्ञोत्रानु
मावाहयाम्यहं॥१॥कलिंगदेशोद्भवंकाश्यपसगोत्रंसूर्यमावाहयामि॥ब्रह्मानिर्जमदग्नि
र्हतासूर्यः।सूर्यग्रहस्थापनेविनियोगः॥ॐब्रह्मा॰ऋ॰सि॰ऋ॰सि॥१॥प्राङ्मुखंसूर्यंस्थाप
यामि॥१॥आग्नेयेचतुरस्रमंडलेआप्यायस्वेतिमंत्रेणश्वेततंदुलैःस्थापयेत्॥ॐभूर्भुवःस्वः
शीतांशुःशंखवर्णोनोद्विजराजविभुर्जने।त्वयिप्रजांकुर्वंतुमित्रंसोममावाहयाम्यहं॥२॥य
मुनातीरोद्भवंआत्रेयसगोत्रंसोममावाहयामि॥आप्यायस्वेतिमंत्रस्यगोतमोगायत्री
सोमः।सोमग्रहस्था॰ॐआप्यायस्व॰प्रत्यङ्मुखंसोमंस्थापयामि॥२॥दक्षिणेत्रिकोणे
अग्निर्मूर्द्धेतिमंत्रेणश्वेततंदुलैःस्थापयेत्॥ॐभूर्भुवःस्वःग्रहाणामतिबलंनीदृक्षंदी
नांगारसमप्रभं।नित्यंमंदारुणाभासंभौममवाहयाम्यहं॥३॥अवंतीदेशोद्भवंभारद्वा
मा१

जगोत्रं सोममावाहयामि। अग्निर्मूर्द्धेति मंत्रस्य विरूपांगीरसो गायत्री सोमः। सोमग्र
हं॰ अग्निमूर्द्धा दि॰ तिदक्षिणामुखं सोमं स्थापयामि॥३॥ बुधं ईशानकोणे बाणाकारमंड
ले अग्ने विवस्वेति मंत्रेण श्वेततंदुलैः स्थापयेत्॥ ॐ नूनं वः स्वः पीत॰ शशिसुत॰ सौ
2 म्य॰ हिरण्यनरण प्रियं। ऐंदवः सौम्यनामानं बुधमावाहयाम्यहं॥ मगधदेशोद्भवं मा
त्रेयसगोत्रं बुधमावाहयामि। अग्ने विवस्वेति मंत्रस्य प्रस्कण्वः कण्वो बृहती बुधः॥
ग्रहस्था॰ अग्ने विवस्व॰ उदङ्मुखं बुधं स्थापयामि॥४॥ ब॰ उत्तरे दीर्घचतुरस्रमंडले
बृहस्पत इति मंत्रेण श्वेततंदुलैः स्थापयेत्॥ ॐ नूनं वः स्वः सुराणां गुरुपीताभं प्रालि
नां क्लेशनाशनं। यजेज्जीवं प्रालिनां त्वं गुरुमावाहयाम्यहं॥ सिंधुदेशोद्भवमांगिर शाव
सगोत्रं बृहस्पतिमावाहयामि। बृहस्पत इति मंत्रस्य इंद्र त्रिष्टु बृहस्पतिः। ग्रहस्था॰ ॐ ॥२॥

बृहस्पते॰ उदङ्मुखं बृहस्पतिं स्थापयामि ॥ ५ ॥ शुक्रं पूर्वे पंचकोणमंडले शुक्रं तद् इति मंत्रे
ण श्वेततंदुलैः स्था॰ ॐ भूर्भुवः स्वः सुरारिगुरु महावीर्यमसुराणां च मंत्रिणं । शुभं स्वगोक्षी
रवर्णाभं शुक्रमावाहयाम्यहं ॥ भोजकटदेशोद्भवं भार्गवसगोत्रं शुक्रमावाहयामि ॥ शु
क्रं तद् इति मंत्रस्य भरद्वाजो बार्हस्पत्यस्त्रिष्टुप् शुक्रः । ग्रहस्था॰ शुक्रं नेत्रन्यत॰ प्राङ्मु
खं शुक्रं स्थापयामि ॥ ६ ॥ शनिं पश्चिमे धनुराकारमंडले शन्नो देवीति मंत्रेण श्वेततं
दुलैः स्थापयेत् ॥ ॐ भूर्भुवः स्वः वक्रानुवक्रगमनं॰ स्वच्छंदगतिचारिणं । असिता
यसवर्णाभं सौरिमावाहयाम्यहं ॥ सौराष्ट्रदेशोद्भवं काश्यपसगोत्रं शनिमावाह
यामि ॥ शन्नो देवीति मंत्रस्य सिंधुद्वीपांबरीषो गायत्री शनिः ग्रहस्था॰ शन्नो देवी॰
प्रत्यङ्मुखं शनिं स्थापयामि ॥ ७ ॥ राहुं नैरृतिकोणे शूर्पाकृतिमंडले कयानश्चित्र

इतिमंत्रेणश्वेततंदुलैः स्थापयेत्॥ॐभूर्भुवः स्वः चंद्रार्कौ ग्रसतेयस्तु ग्रसतावुसृजते
पुनः॥नीलमेघप्रतीकाशं राहुमावाहयाम्यहं॥बर्बरकदेशोद्भवं पैठीनसगोत्रं राहु
मावाहयामि॥कयानश्चित्र इतिमंत्रस्य वामदेवो गौतमौ राहुः ग्रहस्था॰ॐ कया
नश्चि॰ दक्षिणामुखं राहुं स्थापयामि॥१॥ केतुं वायव्यकोणे ध्वजाकारमंडले
केतुं कृण्वन्नितिमंत्रेणश्वेततंदुलैः स्थापयेत्॥ॐ भूर्भुवः स्वः ग्रहाणामुपग्रहं श्रेष्ठं
ग्रहनक्षत्रचारिणं॥निर्वाणांगारवर्णाभं केतुमावाहयाम्यहं॥अंतर्वेदिसमुद्भ
वं जैमिनसगोत्रं केतुमावाहयामि॥केतुं कृण्वन्नितिवैश्वामित्रो मधुच्छंदा गाय
त्री केतुः ग्रहस्था॰ॐ केतुं कृण्वन्॰ दक्षिणामुखं केतुं स्थापयामि॥१॥ अथाधि शिव
देवतानां स्थापनं॥अधिदेवता आदित्यादिमुखाः शुक्लतंदुलैः स्थापयेत्॥स ॥३॥

द्रं सूर्यस्योत्तरे आवोराजेतिमंत्रेणस्थापयेत्॥ ॐ भूर्भुवःस्वः रुद्रमावाहयामि। आवोरा
जेतिमंत्रस्यवामदेवोगौतमस्त्रिष्टुप्रुद्रः॥ स्थानेपं० ॐ आवोराजान० रुद्रंस्थापया
मि।१०॥ सोमस्याग्नेये उमां॥ ॐ भूर्भुवःस्वः उमामावाहयामि मदच्युद्दितिमंत्रस्य
असितःकाश्यपोगायत्री उमा। स्थाप० मदच्युद्रे० उमांस्थापयामि॥११॥ नोमस्यदक्षि
णे॥ ॐ भूर्भुवःस्वः स्कंदमावाहयामि। आमंद्रैरितिमंत्रस्यविश्वामित्रोगाथिनोबृह
ती स्कंदः स्थाप० आमंद्रैरिंद्र० स्कंदंस्थाप०॥१२॥ बुधस्यपश्चिमे॥ ॐ भूर्भुवःस्वः वि
ष्णुमावाहयामि। इदंविष्णुरितिमंत्रस्यमेधातिथिःकाण्वोगायत्री विष्णुःस्थाप०
इदंविष्णु० विष्णुंस्था०॥१३॥ गुरोःपूर्वेब्रह्माणं॥ ॐ भूर्भुवःस्वः ब्रह्माणमावाहया
मि। त्वमिस्सप्रेतिमंत्रस्यनर्गःप्रगाथिनोबृहती ब्रह्मा। स्था० त्वमिसप्र० ब्रह्माणं

स्था०॥१३॥शुक्रस्य पूर्वे इंद्रं॥ॐ भूर्भुवः स्वः इंद्रमावाहयामि॥इंद्रमिदिति मंत्रस्य मेधा
तिथिः काण्वो बृहती इंद्रः स्था० इंद्रमिद्दे० इंद्रं स्था०॥१४॥शनैर्यमं नैरृते॥ॐ भूर्भुवः स्वः
यममावाहयामि॥नाकेसुपर्णमिति मंत्रस्य वेनो भार्गवस्त्रिष्टुप् यमः स्थापने० ना
सुकेपर्ण० यमं स्थाप०॥१६॥राहोरुत्तरे कालं॥ॐ भूर्भुवः स्वः कालमावाहयामि
ब्रह्मजज्ञानमिति मंत्रस्य ब्रह्मणस्पतिरांगिरसस्त्रिष्टुप् कालः स्थाप० ब्रह्मजज्ञा
नं० कालं स्था०॥१७॥केतोर्दक्षिणे चित्रगुप्तं॥ॐ भूर्भुवः स्वः चित्रगुप्तमावाहया
मि॥चित्र इति मंत्रस्य वार्हस्पत्य उपस्कृतो जगती चित्रगुप्तः स्थापने० चित्र इच्छि०
चित्रगुप्तं स्था०॥१८॥अथ प्रत्यधिदेवतानां स्थापनं॥तत्र ग्रहाधिदेवतयोर्मध्ये
प्रत्यधिदेवता आदित्याभिमुखाः शुक्लं दुलैः स्थापयेत्॥ॐ भूर्भुवः स्वः अग्निवो

॥५॥

5

मोहयामि॥ अग्निंदूतमितिमंत्रस्यमेधातिथिः काण्वोगायत्र्यग्निःस्था प० अग्निंदूतं० अग्नि
स्था०॥१९॥ ॐभूर्भुवःस्वः अपआवाहयामि॥ उदुत्तममितिमंत्रस्यशुनःशेपाजीगर्त्ति
स्त्रिष्टुवापःस्था० उदुत्तमं० अपःस्था०॥२०॥ ॐभूर्भुवःस्वः क्षितिमावाहयामि॥ नमःपृ
थिव्यैइतिमंत्रस्यपरमेष्ठीप्रजापतिरनुष्टुप्पृथिवीस्था० नमःपृथिव्यै० पृथिवींस्था०॥२१॥
ॐभूर्भुवःस्वः विष्णुमावाहयामि॥ सहस्रशीर्षाइतिमंत्रस्यनारायणःकाश्यपोनुष्टुप्
विष्णुःस्था० सहस्रशीर्षा० विष्णुंस्था०॥२२॥ ॐभूर्भुवःस्वः इंद्रमावाह० इंद्रायेतिमंत्रस्य
मारीचःकश्यपोगायत्रीइंद्रःस्था०॥ इंद्रायेंदो० इंद्रंस्था०॥२३॥ ॐभूर्भुवःस्वः इंद्राणीमा
वाहयामि॥ नकिरिंद्रइतिमंत्रस्यवामदेवोगोतमोगायत्रीइंद्राणीस्था० नकिरिंद्रत्वदुत्तरं० इं
द्राणींस्थापयामि॥२४॥ ॐभूर्भुवःस्वः प्रजापतिमावा० प्रजापतइतिमंत्रस्यवरुणःप

ड्रिं: प्रजापती ।स्ना० प्रजापतेन० प्रजापतिंस्ना० ॥२५॥ ॐ भूर्भुवः स्वः सर्पानावाहयामि ॥
या० सेधानितिमंत्रस्य परमेष्ठी प्रजापतिर्यजुः सर्पाः स्नापने० या० सेधा० समघत्त
सूय० ० सर्पास्ना० ॥२६॥ ॐ भूर्भुवः स्वः ब्रह्माणमावाहयामि । एषब्रह्मा इतिमंत्र
स्यकवषऐन्द्रषो द्विपदागायत्री ब्रह्मा स्ना० एषब्रह्माय० ऽस्तु० ब्रह्माणं स्ना० ॥२७॥
अथविनायकादिपंचदेवतानां स्नापनं ॥ शुक्लतंदुलैः वक्ष्यमाणस्थानेषु स्नापये
त् ॥ राहोरुत्तरभागे ॥ ॐ भूर्भुवः स्वः विनायकमावाहयामि । आतूनइतिमंत्रस्य
कुसीदिकाण्वो गायत्री विनायकः स्ना० आतूनइंद्र० विनायकं स्ना० ॥२८॥ शनैश्च
रस्योत्तरभागे दुर्गां ॥ ॐ भूर्भुवः स्वः दुर्गामावा० इम० स्तोममितिकुत्सो गिरसो जग
तीदुर्गा स्ना० इम० स्तोम० दुर्गां स्ना० ॥२९॥ सूर्यस्योत्तरभागे वायुं ॥ ॐ भूर्भुवः स्वः ॥५॥

वायुमावा० प्राणाश्चिशुरिति मंत्रस्य त्रित आप्त्य उष्णिक् वायुः स्था० प्राणाश्चिशु० वायुं स्था०
॥३०॥ राहो दक्षिणे नागे आकाशं। ॐ भूर्भुवः स्वः आकाशमा० आदित्प्रत्ने० मंत्रस्य वत्स
काण्वो गायत्र्याकाशः। स्था० आदित्प्रत्न० आकाशं स्था०॥३१॥ केतो दक्षिणे नागे अश्वि
नी कुमारौ। ॐ भूर्भुवः स्वः अश्विनी कुमारमावा० एषो उषा इति मंत्रस्य प्रस्कण्वः काण्
वो गायत्र्यश्विनौ॥ स्था० एषो उषा० अश्विनी कुमारौ स्था०॥३२॥ अथेंद्रादि दशदिका
नां स्थापनं शुक्लतंदुलैः। पूर्वे इंद्रं। ॐ भूर्भुवः स्वः इंद्रमावाह० त्रातारमिति मंत्रस्य
गर्ग आंगिरस त्रिष्टुब् इंद्रः स्था० त्रातारमि० इंद्रं स्था०॥३३॥ आग्नेय्यां अग्निं। ॐ भूर्भुवः स्वः
अग्निमावा० अग्निस्तिग्मेनेति मंत्रस्य बार्हस्पत्यो भरद्वाजो गायत्र्यग्निः। स्था० अग्नि
स्तिग्मेन शो० अग्निं स्था०॥३४॥ दक्षिणे यमं। ॐ भूर्भुवः स्वः यममावा० नाके सुपर्णमि

तिमंत्रस्यवेनोभार्गवस्त्रिष्टुप्यमः।स्था॰ नाकेसुपर्ण॰ यमंस्था॰॥२५॥नैर्ऋतेनिर्ऋति
ॐभूर्भुवःस्वः निर्ऋतिमावा॰ वेछाहीतिमंत्रस्यव्यश्वमनावैयश्वःककुप्निर्ऋतिःस्था॰
वेछाहिनिर्ऋ॰ निर्ऋतिंस्था॰॥२६॥पश्चिमेवरुणं ॐभूर्भुवःस्वः वरुणमा॰ यदाक्रदे
तिमंत्रस्यवासिष्ठःसप्तोबृहतीवरुणः।स्था॰ यदाक्रदाच॰ वरुणंस्था॰॥२७॥वाय
व्येवायुं ॐभूर्भुवःस्वः वायुमावा॰ वातआवात्वितिमंत्रस्यउलोवातायनोगाय
त्रीवायुः।स्था॰ वातआवातु॰ वायुंस्था॰॥२८॥उत्तरेसोमं ॐभूर्भुवःस्वः सोमम्मा
वा॰ तवाहमितिमंत्रस्यभरद्वाजःकश्यपोगोतमोत्रिर्विश्वामित्रोजमदग्निर्वसि
ष्ठोबृहतीसोमः।स्था॰ तवाह॰ सो॰ सोमंस्था॰॥२९॥ईशानेईशानं ॐभूर्भुवःस्वः ई
शानमावा॰ अभित्वाशूरेतिमंत्रस्यवसिष्ठोमैत्रावरुणोबृहतीशानःस्थाप॰ अभित्वा ॥६॥

रंभ्रं॰ ईशानं स्था॰॥५॰॥ पूर्वे परमेष्ठिनं॥ ॐ भूर्भुवः स्वः परमेष्ठिनमावा॰ मयि वर्च इति
मंत्रस्य परमेष्ठि प्रजापतिरनुष्टुप् प्रजापतिः।स्था॰ मयि वर्चो॰ परमेष्ठिनं स्था॰॥६॥
पश्चिमे विष्णुं ॐ भूर्भुवः स्वः विष्णुमावाह॰ अतो देवे इति मंत्रस्य मेधातिथिः काण्वो गा
यत्री विष्णुः स्था॰ अतो देवा अ॰ विष्णुं स्था॰॥७॥ अथ नवग्रहाणां स्थापनं। तत्र पूर्वे
तदीशानपर्यंतान् ग्नीन्व्याहृत्यावाह्य शुक्ल तंदुलैः स्थापयेत्॥ ॐ भूर्भुवः स्वः कपि
लं आवाहयामि स्थापयामि॥१॥ ॐ भू॰र्भु॰ पिंगलं आवा॰ स्थाप॰॥२॥ ॐ भू॰र्भु॰ धूमके
तुं आवा॰ स्थापया॰॥३॥ ॐ भूर्भुवः स्वः जठराग्निमावा॰ स्था॰॥४॥ ॐ भू॰र्भु॰ शिखि
नं आवा॰ स्थापया॰॥५॥ ॐ भूर्भुवः स्वः हाटकं आवा॰ स्था॰॥६॥ ॐ भू॰र्भु॰ महाते
सं॰१ जं आवा॰ स्थापया॰॥७॥ ॐ भूर्भुवः स्वः हुताशनं आ॰ स्था॰॥८॥ ॐ भू॰र्भु॰ हुताश

१०१ नेत्रावाहयामिस्थापयामि॥ अथ यदनक्षत्राणां स्थापनं॥ तत्र पूर्वतदीशानपर्यन्ता
न्नक्षत्रान्व्याहृत्यावाघमक्के तंदुलैः स्थापयेत्॥ ॐ भूर्भुवः स्वः पुष्यं आवाहयामि
स्थापयामि॥१॥ एवं सर्वत्र॥ ॐ भू॰ उत्तराफाल्गुनी आ॰ स्था॰॥२॥ ॐ भू॰ विशाखामा॰
स्था॰॥३॥ ॐ भूर्भु॰ पूर्वाषाढामा॰ स्था॰॥४॥ ॐ भू॰ धनिष्ठामा॰ स्था॰॥५॥ ॐ भू॰ कृत्तिकामा॰
स्था॰॥६॥ ॐ भूर्भु॰ रोहिणीमा॰ स्था॰॥७॥ ॐ भू॰ भरणीमा॰ स्था॰॥८॥ ॐ भू॰ अश्लेषामा॰
स्था॰॥९॥ अथ स्थापितदेवता नां प्राणप्रतिष्ठां कुर्यात्॥ ॐ भूर्भुवः स्वः वाङ्मनः
प्राण॰ प्रतिष्ठेति सामान्यमन्त्रैः प्रतिष्ठां कुर्यात्॥ आदित्यादिग्रहाः साधिप्रत्यधि
देवताः सुप्रतिष्ठावरदा भवन्तु॥ नवग्रह स्थापना विधिः समाप्त ॥१७॥